श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीवेगासेतुस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेगासेतुस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

एकं वेगवतीमध्ये हस्तिशैले च दृश्यते।
उपायफलभावेन स्वयं व्यक्तं परं महः॥ १ ॥

ईष्टे गमयितुं पारम् एष सेतुरभङ्गुरः।
यत्र सारस्वतं स्रोतो विश्राम्यति विशृङ्खलम्॥ २ ॥

जयति जगदेकसेतुः
वेगवतीमध्यलक्षितो देवः।
प्रशमयति यः प्रजानां
प्रथितान् संसारजलधिकल्लोलान्॥ ३ ॥

विभातु मे चेतसि विष्णुसेतुः
वेगापगावेगविघातहेतुः।
अम्भोजयोनेर्यदुपज्ञमासीत्
अभङ्गरक्षा हयमेधदीक्षा॥ ४ ॥

चतुराननसप्ततन्तुगोप्ता
सरितं वेगवतीमसौ निरुन्धन्।
परिपुष्यति मङ्गळानि पुंसां
भगवान् भक्तिमतां यथोक्तकारी॥ ५ ॥

श्रीमान् पितामहवधूपरिचर्यमाणः
शेते भुजङ्गशयने स महाभुजङ्गः।
प्रत्यादिशन्ति भवसञ्चरणं प्रजानां
भक्तानुगन्तुरिह यस्य गतागतानि॥ ६ ॥

www.prapatti.com

प्रशमितहयमेधव्यापदं पद्मयोनेः
 श्रितजनपरतन्त्रं शेषभोगे शयानम्।
शरणमुपगताः स्मः शान्तनिःशेषदोषं
 शतमखमणिसेतुं शाश्वतं वेगवत्याः॥ ७ ॥

शरणमुपगतानां सोऽयमादेशकारी
 शमयति परितापं संमुखः सर्वजन्तोः।
शतगुणपरिणामः सन्निधौ यस्य नित्यं
 वरवितरणभूमा वारणाद्रीश्वरस्य॥ ८ ॥

काञ्चीभाग्यं कमलनिलयाचेतसोऽभीष्टसिद्धिः
 कल्याणानां निधिरविकलः कोऽपि कारुण्यराशिः।
पुण्यानां नः परिणतिरसौ भूषयन् भोगिशय्यां
 वेगासेतुर्जयति विपुलो विश्वरक्षैकहेतुः॥ ९ ॥

वेगासेतोरिदं स्तोत्रं वेङ्कटेशेन निर्मितम्।
ये पठन्ति जनास्तेषां यथोक्तं कुरुते हरिः॥ १० ॥

॥ इति श्रीवेगासेतुस्तोत्रं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com